दिनाङ्क :-08.04.2025

प्रात: - 06:55

## राष्ट्रपतिः पोर्तगाल यात्रा

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः प्रोक्तवती यत् भारतीयनागरिकाः पुर्तगालदेशे चतुर्थस्य बृहत्तमस्य समुदायस्य प्रतिनिधित्वं कुर्वन्ति ये द्वयोः संस्कृत्योः मध्ये सेतुत्वेनापि कार्यं निष्पादयन्ति अपि च देशस्य अर्थव्यवस्थायां महत्वपूर्णम् योगदानं ददति। राष्ट्रपतिपदासीनायै द्रौपदीमुर्मु इत्यस्यै ह्यः ऐतिहासिके कैमारा-म्युनिसिपल- डे- लिस्बोआ- स्थले लिस्बन- नगरस्य महापालिकाध्यक्षेण नगरस्य की ऑफ ऑनर इतीदं सम्मानं प्रदत्तम्। समारोहं सम्बोधयन्ती राष्ट्रपतिना निगदितं यत् वसुधैव कुटुम्बकम् इत्येतस्य मन्त्रस्य आलोकेन अपि च सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसितभारतस्य निर्माणदृष्ट्या निर्दिष्टं भारतम् एकस्य स्थायिविश्वस्य दिशि कार्यं निरन्तरं कुर्वदस्ति अस्यां यात्रायाञ्च पुर्तगालदेशं विश्वनीयसहभागिनः रूपेण द्रक्ष्यति। इतः पूर्वं ह्यः राष्ट्रपतिः मुर्मु लिस्बन- नगरे स्वीयेन समकक्षेण मार्सेलो- रेबेलो डी- सूसा- इत्यमुना साकं प्रतिनिधिमण्डलस्तरीयां वार्तां साधितवती।

## दुबईराजकुमारयात्रा

दुबय्याः युवराजः उप-प्रधानमन्त्री संयुक्तारबामीरातस्य रक्षामन्त्री च शेख- हमदान- बिन- मोहम्मद- अल- मक्तुमः अद्यारभ्य भारतस्य द्विदिवसीय यात्रायामस्ति इति सूच्यते। युवराजत्वेन तस्य इयं प्रथमा आधिकारिकी भारतयात्रा स्यादिति। विदेशमन्त्रालयेन प्रख्यापितं यत् प्रधानमन्त्री नरेन्द्रमोदी युवराजाय मध्याह्नभोजनस्य आतिथ्यं करिष्यति। यात्रारतः एषः विदेशमन्त्रिणा डॉ एस् जयशंकरेण रक्षामन्त्रिणा राजनाथसिंहेनापि मन्त्रणां विधास्यति।

**सीतारामन- ब्रिटेनयात्रा**

**वित्तमन्त्री निर्मलासीतारामन् इत्येषा यूरोप- महाद्वीपस्य षट्दिवसीय- यात्रायां ह्यः सायंकाले लन्दननगरं सम्प्राप्तवती। वित्तमन्त्रिण इयं यात्रा अद्यारभ्य अस्य मासस्य त्रयोदशदिनाङ्कपर्यन्तं प्रचलिष्यति यस्मिन् ऑस्ट्रियादेशस्य यात्रा सम्मिलितास्ति। सुश्रीसीतारामन् इत्येषा अद्य लन्दननगरे भारतीयोच्चायोगे एकेन सम्भाषिकसत्रेण सह स्वब्रिटेनयात्रां सम्पूरयिष्यति।**

**रक्षामन्त्री - संविदा**

**रक्षामन्त्रालयेन एम्आई- 17 वी-5 उदग्राविमानयानानां कृते इलेक्ट्रॉनिक- वार्फेयर सूट् इत्येतस्य विमानपरिवर्तन- किट्स इत्यस्य च क्रयणार्थं बेंङ्गलुरू नगरस्य भारत- इलेक्ट्रॉनिस लिमिटेड इत्येतेन सह पञ्चाशीत्यधिक- त्रिशतोत्तर - द्विसहस्र- कोटिरूप्यकाणाम् अनुबन्धः कृत। एतत् अत्याधुनिकं इलेक्ट्रॉनिक्स - वॉरफेयर सूट् इतीदं प्रतिकूलपर्यावरणे उदग्रविमानयानानां प्रचालनात्मक- जीवनक्षमतां वर्धायिष्यति।**

**अमरिकीयराष्ट्रपतिना डॉनल्डट्रम्प**

**अमरिकीयराष्ट्रपतिना डॉनल्डट्रम्प- इत्यनेन निगदितं यत् अमरिकादेशः ईरानदेशस्य परमाणुकार्यक्रमविषये तेन सह प्रत्यक्षसंवादं साधयिष्यति।**

**अमितशाहः**

**केन्द्रीयगृहमन्त्री अमितशाहः ह्यः सायं श्रीनगरं सम्प्राप्तवान्। श्रीनगर विमानपत्तस्थानके उपराज्यपालः मनोजसिन्हाः मुख्यमन्त्री ओमार- अब्दुल्लाइत्यसौ च आस्ताम्। श्रीशाहः मुख्यमन्त्रिणा अब्दुल्लाइत्येतेन सह आरक्षकोपधीक्षकस्य हुमायूँ - मुजामिल - इत्यस्य आवासं प्रति गतवान् यो हि त्रयोविंशत्यधिकद्विसहस्रतमे वर्षे सितम्बरमासे त्रयोदशदिनाङ्के आतङ्कप्रहारे वीरगतिं प्राप्तवान् आसीत्।**

**<u>आईपीएल्</u>**

**आई.पी.एल् - क्रिकेट मालिकायाम् ह्यः रात्रौ मुम्बय्याः वानखेडे-क्रीडाङ्गणे रॉयर-चैलेन्जर्स - बेङ्गलुरूदलेन मुम्बई- इण्डियन्सदलं द्वादश धावनाङ्कैः पराभूतम्।**

**इति वार्ताः**